Dat.	नेत्रे	नेतृभ्याम्	नेतृभ्यः

Nom.	भ्राता	भ्रातरौ	भ्रातरः
Acc.	भ्रातरम्	भ्रातरौ	भ्रातॄन्
Instr.	भ्रात्रा	भ्रातृभ्याम्	भ्रातृभिः
Dat.	भ्रात्रे	भ्रातृभ्याम्	भ्रातृभ्यः

SUBSTANTIVES.

Masculine.

इषु an arrow
ऋतुपर्ण name of a king
कपोल cheek
जामातृ son-in-law
तडाग a tank
तरु a tree
त्वष्टृ the architect of the gods
दुर्जन a wicked person
देवृ husband's brother
धातृ the Creator
नृ a man
परशु an axe
परशुराम a Brâhmaṇa who exterminated the warrior caste.
पांसु dust
पितृ father
प्रभु lord
बाहु arm

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

बिन्दु a drop
भर्तृ husband, master
भीम name of one of the sons of Pâṇḍu
भ्रमर a bee
मनु the Hindu legislator
लक्ष्मण brother of Râma
वायु wind
विघ्न an obstacle
विमार्ग a wrong path
विष्णु the god Vishṇu
शत्रु an enemy
शम्भु the god S'iva
शिशु an infant, a child
सव्येष्टृ a charioteer

Masc. & Neuter.

कर्तृ doer, author
गन्तृ goer
दातृ giver, donor
द्रष्टृ seer
द्वेष्टृ hater
रक्षितृ defender, protector

Neuter.

अग्र the tip
अश्रु a tear
तालु palate
मधु honey
राष्ट्र a country, [nation
वसु wealth

Feminine.

अमरावती Indra's capital
जिह्वा tongue

ADJECTIVES.

क्षुधित hungry | श्याम dark

INDECLINABLES.

अनेकशस् frequently
तु but (not used at the beginning of a sentence)

ROOTS.

इष् *4th conj. Parasm. with* अनु to search for
गम् *with* अनु to go after, to follow
गल् *1st conj. Parasm.* to drop
छिद् *pass.* to be cut off
नी *with* प्र, to compose, write
भृ *1st conj. Parasm. and Âtm.* to fill; भ्रियते *pass.*
मन् *with* अनु to consent to, to agree to
मा *with* निर् to produce, to create; निर्मीयते *Pass.*
वाञ्छ *1st conj. Parasm.* to desire

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

अ prefixed to words beginning with a consonant and अन् to those beginning with a vowel, express negation.

SENTENCES.

शम्भुर्जयति ।
बाहू स्फुरतः ।
वायुना तरवः कम्पन्ते ।
भ्रमरा मधु पिबन्ति ।
नरो वसूनि वाञ्छन्ति ।
इन्द्रः शत्रूनजयत् ।
योधोऽराविषू क्षिपति ।
चातको जलस्य बिन्दुमपि न लभते ।
विष्णवे पूजा रोचते ।
प्रभुभिर्भृत्या आदिश्यन्त ।
विश्वस्य कर्तारं नमामि ।
गुरुभ्यः शिष्यस्याविनयं कथयामि ।
सीता लक्ष्मणं देवरमन्वगच्छत् ।
कन्याया भर्तारं जामातरं वदन्ति ।
भर्त्रे संदेशः प्रहीयते ।
नार्याः कपोलयोर्नयनाभ्यामश्रूणि गलन्ति ।
त्वष्ट्रामरावती निरमीयत ।
पितरो वन्द्यन्ते पुत्रैः ।
रामो जनकस्य जामाता ।
पाण्डवा द्वेष्टॄन् युद्धेऽजयन् ।
भर्तारमनुसरति किंकरः ।
मनुना धर्मः प्राणीयत ।
धात्रा प्रजाः सृज्यन्ते ।
तडागस्य जलं मार्गे गन्तृभिरपीयत ।
याचका दातारं नालभन्त ।

Râma gives sweetment to children.
(The) sky is filled with dust.
Paras'urâma struck (his) enemies with (an) axe.
Drops of water fall from (the) clouds.
(The) king called (the) defenders of (the) town.
(A) child obeys (his) father.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

(The) Lord of Avantî spoke to (his) ministers.

Hari touched (his) palate with (his) tongue.

Women went to (the) garden with (their) husbands.

(The) Ṛishis were the seers [of *mantras*.

People adore Vishṇu.

Ṛituparṇa spoke to (his) charioteers.

Râma went to (the) forest with (his) brother Lakshmaṇa.

Râvaṇa's heads were cut off* by Râma with arrows.

(A) work is frequently not begun by men for fear of obstacles.

With (his) arms Bhîma fought with (his) enemy.

(The) gods punish (the) doers of evil.

Those who go (the goers) by (the) wrong path are censured by men.

Virtue is (the) protector of (a) country (nation) from ruin.

Honey dwells on (the) tip of (the) tongue of (a) wicked person, but in (his) heart poison.

Trees delight travellers by (their) shade.

Râma's departure to (a) forest with Vis'vâmitra was consented to by (his) father.

(The) wind is scattering (the) dark clouds.

People praise (the) givers of food to (the) hungry.

Sîtâ's husband and (her) husband's brother searched for Sîtâ.

---

* ऊ following a vowel is changed to ऽ. This change takes place optionally when the vowel is long and at the end of a word or grammatical form; but after मा (negative particle) and आ (preposition) it is necessary.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

LESSON XX.

NOUNS ENDING IN उ AND ऋ.—MASC. & NEUT.—

(*Continued*).

			Singular	*Dual*	*Plural*
Nouns in ऋ	Masc.	Abl.	(none)	भ्याम्	भ्यस्
		Gen.	(none)	ओस्	नाम्
		Loc.	इ	ओस्	सु

The singular of the ablative and genitive cases is formed by substituting उर् for ऋ. Before the इ of the locative singular, ऋ takes अर् as its substitute, and before नाम् it is lengthened. This latter change is optional in the case of नृ. The vocative singular is made up by putting अर् for ऋ and the dual and plural are the same as those of the nominative.*

Masculine.

	Singular	*Dual*	*Plural*
Abl.	नेतुः	नेतृभ्याम्	नेतृभ्यः
Gen.	नेतुः	नेत्रोः	नेतॄणाम्
Loc.	नेतरि	नेत्रोः	नेतृषु
Voc.	नेतर्	नेतारौ	नेतारः

Neuter.

Abl.	कर्तॄणः	कर्तृभ्याम्	कर्तृभ्यः
Gen.	कर्तॄणः	कर्तॄणोः	कर्तॄणाम्
Loc.	कर्तॄणि	कर्तॄणोः	कर्तृषु
Voc.	कर्तर् or कर्तृ	कर्तॄणी	कर्तॄणि

*See rule, page 30.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

Masculine.

	Singular	*Dual*	*Plural*
Abl.	गुरोः	गुरुभ्याम्	गुरुभ्यः
Gen.	गुरोः	गुर्वोः	गुरूणाम्
Loc.	गुरौ	गुर्वोः	गुरुषु
Voc.	गुरो	गुरू	गुरवः

Neuter.

Abl.	मधुनः	मधुभ्याम्	मधुभ्यः
Gen.	मधुनः	मधुनोः	मधूनाम्
Loc.	मधुनि	मधुनोः	मधुषु
Voc.	मधो or मधु	मधुनी	मधूनि

WORDS.

अनुज्ञा *f.* permission

अप्रिय *adj.* unpalatable, disliked

अर्जुन *m.* name of one of the sons of Pâṇḍu

अलङ्घनीय *adj.* that cannot be transgressed

अलम् *ind.* enough, away with (used with the instrumental)

अवस्तु *n.* not a thing, an unreal thing

अवस्त्वारोप *m.* ascribing something that is not real

आदर *m.* respect

आरोप *m.* ascribing

आर्य *m.* a respectable person; name of the remote ancestors of the Hindus

इच्छा *f.* wish

इन्दु *m.* the moon

उत्कण्ठा *f.* anxiety, longing

उत्साह *m.* happiness, cheerfulness, energy

कर्ण *m.* name of a hero

कलङ्क *m.* a stain, a spot

कारुण्य *n.* compassion, kindness

कुरु *m.* name of a country (*in pl.*)

कृतज्ञता *f.* gratitude

कृपा *f.* favour

ज्ञाति *m.* a relation

तनु *adj.* small, little

तूल *m.* cotton

द्विज *m.* one of the first three classes or castes

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

नप्तृ *m.* grandson
निर्बन्ध *m.* importunity
निशित *adj.* sharp
पथ्य *n.* a wholesome thing, what is wholesome
पशु *m.* a beast
पात *m.* fall, falling
पितृव्य *m.* paternal uncle
बन्धु *m.* a relation
भारतवर्षीय *m.* a native of Bharatavarsha or India
भीम *m.* name of one of the sons of Pâṇḍu
भूत *n.* a creature, an animal
भ्रातृ *m.* brother
मद *m.* intoxication, insolence
मृग *m.* deer
मृत्यु *m.* death
रघु *m.* (*in the plural*) the descendants of a king named रघु
रमा *f.* name of a woman
लक्ष्मी *f.* wife of Vishṇu; goddess of wealth
लङ्घ् 1*st conj. Âtm.* to transgress, to overcome
वक्तृ *m. n.* a speaker
वस्तु *n.* a thing, a real thing.
वार्ता *f.* intelligence, news, account
विभव *m.* wealth, riches
वैकुण्ठ *n.* name of the celestial abode of the god Vishṇu
श्रोतृ *m. n.* hearer
साधु *m.* a sage, a man of piety; *adj.* good
स्रष्टृ *m. n.* creator

Sentences.

तरोः पुष्पाण्यपतन् ।
शम्भोः कृपया कल्याणं भवति ।
गुरूणामादेशाननुरुध्यामहे ।
साधवो मृत्योर्भयं न गणयन्ति ।
पितरि रामस्य परम आदरः ।
विश्वस्य स्रष्टुरिच्छाऽलङ्घनीया ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

द्वेष्टॄणामुत्साहं न सहते ।
इन्दौ कलङ्को दृश्यते ।
रामो बन्धुषु स्नेहेन वर्तते ।
मधुनि माधुर्यमस्ति ।
नृषु द्विजः श्रेष्ठः ।
दातृभ्यो धनं लभन्ते ।
कुरुभ्यो दूत आगच्छत् ।
पितृव्यः पितुर्भ्राता ।
वस्तुन्यवस्त्वारोपोऽज्ञानम् ।
बाह्वोर्बलेन पृथ्वीमजयत् ।
भीमस्य भ्रातर्यर्जुने कर्णो बाणानमुञ्चत् ।
तूलस्य राशावग्नेरिव मृदुनि मृगस्य शरीरे निशितस्य बाणस्य पातः ।
तनुषु विभवेषु ज्ञातिभिस्त्यज्यन्ते नराः ।
पशुष्वपि कृतज्ञता दृश्यते ।
श्रोतॄणां निर्बन्धात्कथामारभत ।
अप्रियस्यापि पथ्यस्य वक्तृणि मित्रेऽलं क्रोधेन ।
नमुर्लीभेऽतीवोत्कण्ठा भारतवर्षीयाणाम् ।
परमं कारुण्यं साधूनां भूतेषु।
कन्यां जामातुर्गृहं नयति ।

Râma was (the) chief of the Raghus.
(I) got a book from (the) author.
Lakshmî* was (the) wife of Vishṇu.
(He) begs pardon of (his) hearers.
Janaka saw (the) chariot of (his) grandsons.
Nârâyaṇa saw (the) horses of Hari's sons-in-law.
(The) Âryas lived in (the) Kurus.
(A) parrot sat on (the) tree.
(A) servant of Hari's grandson went to (a) village.
Karṇa was (the) first among donors.

* This noun takes सु in the nom. sing.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

(The) lion is (the) lord of beasts.

Hari is (the) friend of Ramâ's husband.

(The) disc of (the) moon increases and decreases.*

By order of (his) brother, Râma, Lakshmaṇa abandoned Sîtâ in a forest.

From (the) Creator was born (the) universe.

(She) obtained news of (her) husband.

By (the) strength of (his) arm (he) conquered (his) enemies.

(There) is no fear for (the) mountains even from (a) strong wind.

Wise men get knowledge even from children.

Sins afflict (my) heart, O Śambhu!

In sages is seen great love for God.

Birds sit on (the) branches of trees.

Servants do not transgress (the) orders of (their) lords.

From (her) husband (she) obtained permission for going to (her) mother's house.

(A) residence in *Vaikuṇṭha* is obtained by the devotees of Vishṇu.

Examination.

1. Decline द्रष्टृ *m.* and *n.*, मधु, मनु, जामातृ, अम्बु, धातृ *m.*, नृ, देष्टृ, शत्रु, विधु *m.* and *n.*, भ्रातृ, स्रष्टृ *m.*, वस्तु, वायु, &c., &c.

2. Compare the declensions of masculine nouns ending in उ and neuter nouns ending in उ and ऋ with those of nouns ending in इ.

---

* Use कि *Pass.*

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

3. What change or changes does the ending ऋ of masc. nouns undergo in the first five inflexions?

4. When is छ changed to च्छ? When is the change optional and when necessary?

LESSON XXI.

Feminine Nouns ending in इ, उ, ऊ, and ऋ.

Feminine nouns ending in ऊ are declined like those in ई, उ, ऊ, or ऋ being substituted for the इ, ई or ऋ occurring in the latter. The termination of the nominative singular is स.

The termination of the instrumental singular of feminine nouns ending in इ or उ is आ, and that of the accusative plural is स, before which latter the final vowel is lengthened. In other respects these nouns are declined like the corresponding masculine. The forms for the dative, ablative, genitive, and locative singulars are optionally made up like those of nouns ending in ई or ऊ respectively.

Feminine nouns ending in ऋ are such as express relationship. They are स्वसृ, मातृ, दुहितृ, ननान्द and यातृ. The accusative plural termination is स, before which the ऋ of all these nouns is lengthened. In other respects स्वसृ is declined like नप्तृ or गन्तृ *m.*, and the rest like पितृ.

Adjectives ending in ऋ, such as श्रोतृ, गन्तृ, &c. form their feminine by adding ई; as श्रोत्री, गन्त्री, &c.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

श्वशू.

	Singular	Dual	Plural
Nom.	श्वशूः	श्वश्वौ	श्वश्वः
Acc.	श्वशूम्	श्वश्वौ	श्वशूः
Instr.	श्वश्वा	श्वशूभ्याम्	श्वशूभिः
Dat.	श्वश्वै	श्वशूभ्याम्	श्वशूभ्यः
Abl.	श्वश्वाः	श्वशूभ्याम्	श्वशूभ्यः
Gen.	श्वश्वाः	श्वश्वोः	श्वशूणाम्
Loc.	श्वश्वाम्	श्वश्वोः	श्वशूषु
Voc.	श्वशु	श्वश्वौ	श्वश्वः

मति.

Nom.	मतिः	मती	मतयः
Acc.	मतिम्	मती	मतीः
Instr.	मत्या	मतिभ्याम्	मतिभिः
Dat.	मतये-मत्यै	मतिभ्याम्	मतिभ्यः
Abl.	मतेः-मत्याः	मतिभ्याम्	मतिभ्यः
Gen.	मतेः-मत्याः	मत्योः	मतीनाम्
Loc.	मतौ-मत्याम्	मत्योः	मतिषु
Voc.	मते	मती	मतयः

धेनु.

Nom.	धेनुः	धेनू	धेनवः
Acc.	धेनुम्	धेनू	धेनूः
Instr.	धेन्वा	धेनुभ्याम्	धेनुभिः
Dat.	धेनवे-धेन्वै	धेनुभ्याम्	धेनुभ्यः
Abl.	धेनोः-धेन्वाः	धेनुभ्याम्	धेनुभ्यः
Gen.	धेनोः-धेन्वाः	धेन्वोः	धेनूनाम्
Loc.	धेनौ-धेन्वाम्	धेन्वोः	धेनुषु
Voc.	धेनो	धेनू	धेनवः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

मातृ.

	Singular	*Dual*	*Plural*
Nom.	माता	मातरौ	मातरः
Acc.	मातरम्	मातरौ	मातॄः
Instr.	मात्रा	मातृभ्याम्	मातृभिः
Dat.	मात्रे	मातृभ्याम्	मातृभ्यः
Abl.	मातुः	मातृभ्याम्	मातृभ्यः
Gen.	मातुः	मात्रोः	मातॄणाम्
Loc.	मातरि	मात्रोः	मातृषु
Voc.	मातर्	मातरौ	मातरः

SUBSTANTIVES.

Feminine.

अङ्गलभूमि England
अनुरक्ति love
कान्ति splendour, light
कीर्ति fame
कृति action
गति mode of walking, going, gait
जाति caste, kind
दुष्कृति wicked action
दुहितृ daughter
धृति courage
धेनु a cow
ननान्द husband's sister
नीति politics
प्रकृति ministry; dispositon, nature
प्रतिकृति image or copy
प्रीति affection, satisfaction
बुद्धि talent
भक्ति devotion
भूति prosperity
भूमि ground, land, the earth
मातृ mother
मुक्ति absolution
मूर्ति an image or idol
यातृ husband's brother's wife
रति pleasure; the wife of the god of love
रात्रि night
वधू a young woman, daughter-in-law
वसति place of residence
वृत्ति profession, avocation

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

श्रुति hearing; Hindu religious books, the Vedas
श्वश्रू mother-in-law
सुकृति virtuous or good action
सृष्टि creation
स्तुति praise
स्मृति remembrance; Hindu law-books
स्वसृ sister

अङ्गल *m.* an Englishman
आध्यान *n.* meditation [age
आश्रम *m.* hermit-
ऋष्यशृङ्ग *m.* son-in-law of दशरथ and brother-in-law of राम
एलापुर *n.* name of a city, Verula
कृ *with* अधि to authorize, (*Pass.*) to be authorized
चल् 1*st conj. Parasm.* to go astray, to go wrong
चिह्न *n.* a token
धा (धी *Pass.*) *with* अभि to call, to name
धीर *adj.* bold (man)
निन्दा *f.* censure
निपुण *adj.* proficient
पद् *with* उद् 4*th conj. Âtm.* to be produced, to result
पर *adj.* great, greatest
परिणाम *m.* result
पश्चात् *ind.* afterwards
पिण्ड *m.* a ball of rice given to the dead
प्रकर्ष *m.* intensity, greatness
प्रच्छ् [पृच्छ्] *with* आ *Âtm.* to take leave of, as at the time of departure
बहु *adj.* many
मदन *m.* god of love
मन्द *adj.* slow
लोभ *m* avarice
विकास *m.* development
विवर *n.* a cave
शम्बूक *m.* name of a person
शान्ता *f.* sister of Râma
शूद्र *m.* a person of the lowest Hindu caste
शौर्य *n.* valour
श्लिष् *with* आ 4*th conj. Parasm.* to embrace

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

सद् *with* नि [निषीद्] 1*st conj. Parasm.* to sit

संनिधि *m.* proximity, vicinity

सुजन *m.* a good person, a good man

सृ *with* प्र to spread

स्निह् 4*th conj. Parasm.* to feel affection

SENTENCES.

सुजनस्य कीर्तिर्लोके प्रसरति ।

संकटे धीरो धृतिं न मुञ्चति ।

रामः प्रीत्या पुत्रमाश्लिष्यति ।

मुक्तये देवं भजति ।

यक्षाणां वसत्या आगच्छत् ।

दुःखं दुष्कृतेरुत्पद्यते ।

मदनो रतेर्वल्लभः ।

सृष्ट्याः पालक ईश्वरः ।

बुद्धेः प्रकर्षः कीर्तये भवति ।

भूमौ निषीदति ।

जामातुर्ऋष्यशृङ्गस्याश्रमं रामस्य मातरोऽगच्छन् ।

*यातॄर्नानन्दरं चापृच्छत सीता पश्चादगच्छत्पितुर्गृहम् ।

नारायणस्य कृतयो हरेः प्रीत्यै न भवन्ति ।

श्रुत्यां शूद्रो नाधिक्रियते ।

मूर्खाणां स्तुतीर्निन्दा वा न गणयन्ति बुधाः ।

प्रकृतिभिर्नृपः सेव्यते ।

गोपो धेनू रक्षति ।

वध्वो नद्या जलमानयन्ति ।

श्वश्रूर्जामातरि स्निह्यति ।

चन्द्रस्य कान्तिं पश्यति ।

सुकृतीनां फलमनुभवति ।

लोभेन बुद्धिश्चलति ।

हरिः प्रकृत्या साधुर्वर्तते ।

रामः पित्रे मात्रे च पिण्डानयच्छत् ।

स्मृत्यां धर्मः कथ्यते ।

[मरक्षत् ।

रघोः पिता वसिष्ठस्य धेनु-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

Sîtâ bowed to Ṛishyas'ṛiṅga, (the) husband of (her) husband's sister.

Vis'vâmitra was (a) Kshatriya by caste; afterwards (he) became (a) Brâhmaṇa.

S'ambûka is (a) husbandman by profession.

Sîtâ always pleased (her) mother-in-law.

(The) king's counsellor is proficient in politics.

Among *Smṛitis* Manu's is (the) best.

(The) modesty of young women in Mahârâshṭra is praiseworthy.

Râma saw (his) sister S'ântâ and bowed to (his) mother.

Râma asked (the) man (his) caste.

Men desire prosperity.

Englishmen come here from England.

In (the) caves in (the) vicinity of Verula (there) are many images of gods.

Hari passed* (his) nights in meditation.

Kṛishṇa† had many daughters.

Valour contributes to (is for) fame.

(A) man's disposition is known from (his) actions.

Nârâyaṇa's ruin is (the) result of (his) wicked actions.

Courage is (the) greatest ornament of men.

Great love for God is called devotion.

(The) development of (a) man's talent is (the) result of teaching.

Sîtâ's face is like the moon in (by) splendour.

(An) elephant's gait is slow.

(The) father gave much wealth to (his) daughters.

(The) sister's present was (a) token of affection.

---

* Use the root नी here.

† Use the gen. of 'Krishṇa' and nom. of 'daughters' and the Sanskrit verb corresponding to 'were'. The feminine of adjectives ending in र is optionally the same as the masculine. The other form is made up by adding ई.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Prabhakar Foundation. Digitization: eGangotri

EXAMINATION.

1. Compare:—(*a*.)The declension of feminine nouns ending in ऊ with that of those in ई.

(*b*.) The declension of feminine nouns in इ and उ with that of the corresponding masculine. What do the optional forms of the former resemble?

(*c*) The declension of स्वसृ, मातृ, पितृ, नप्तृ, and गन्तृ *m*. with one another.

2. How is the feminine of adjectives ending in उं and ऋ formed?

3. Decline ननान्द, स्वसृ, रुचि, कीर्ति, वधू, रज्जु *f*., नीति, पृथु *m*, and *f*. &c., &c.

LESSON XXII.

ON THE IMPERATIVE MOOD.

Parasmaipada Terminations.

	Singular	*Dual*	*Plural*
* 1st pers.	आनि	आव	आम
2nd pers.	(none)	तम्	त
3rd pers.	तु	ताम्	अन्तु
	वदानि	वदाव	वदाम
	वद	वदतम्	वदत
	वदतु	वदताम्	वदन्तु

The conjugational signs are added on to the roots before the terminations of the Imperative.

---

* The imperative forms of अस् and अद् are given in the Second Book.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

WORDS.

अनृत *n.* a falsehood, an untruth
अभिधान *n.* name
डिम्भ *m.* a child
दुर्ग *n.* difficulty
दृढम् *adv.* firmly, closely
पाठ *m.* a lesson
पितृ *du.* parents
पूज्य *adj.* worthy of honour
प्रतिक्रिया *f.* retaliation, revenge, the way to revenge
भद्र *n.* well-being, [benefit
भू *with* अनु to experience, to feel
मद् *with* प्र to err, to fall off
मा *ind.* not (prohibitive)
रस *m.* juice
रेरे *interj.* O! oh!
वंश *m.* race
वत्स *m.* a child
वयस्य *m.* companion, friend
शङ्का *f.* doubt
श्रम् *with* वि to rest
सत्त्व *n.* truth, goodness; an animal, a creature
सर्वदा *ind.* always
सुवर्णकार *m.* a goldsmith
सोम *m.* a plant used in sacrifices, or its juice
स्था *with* अनु to carry out, to act according to

SENTENCES.

सत्त्वं जयतु ।
वत्स पितरं प्रणम ।
अयोध्यां दूता गच्छन्तु ।
पुत्रावश्वमारोहताम् ।
रेरे मा विनयं त्यजत ।
सख्यौ पुष्पाण्यानयतम् ।
वयस्योपवनं प्रविशाव ।
जलं त्यज घृतं पिब ।
कथं व्याघ्राणां संनिधौ निवसानि ।
लोको दुर्गाणि तरतु भद्राणि पश्यतु ।
नराणां व्याधयो नश्यन्तु ।
मयूरौ प्रासादस्य शिखरे नृत्यताम् ।
बालका अनृतं मा वदत ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

आसनयोर्निषीदतम् ।
डिम्भ जननीमाह्वय ।
भूपतयः सर्वदा प्रजा धर्मेण रक्षन्तु ।
जनः सदानन्दमनुभवतु ।
शत्रोः प्रतिक्रियामुपदिशत ।
पितरौ प्रसीदतम् ।

सत्यान्मा प्रमाद्याम ।
सुवर्णकारस्सुवर्णं तोलयतु ।
पित्रोर्गुरोश्च वचनमनुतिष्ठ ।
पूज्यान्पूजय ।
विश्राम्यन्तु पान्थास्तरोश्छायायाम् ।
क्षालयतां हस्तौ बालौ ।

Tell (your) brother's name.
Children, go to school and learn (your) lesson.
God save (the) king.
*Let (us) follow (the) counsels of wise men.
(The) gods be satisfied.
Hari and Mâdhava, do not prattle.
Leave off doubt as† to Râma's success.
May (the) enemies of men thus perish.
Give money to (the) poor.
Châṇḍâla, do not touch (a) Brâhmaṇa.

Let (him) drink (the) juice of Soma.
May (he) remember (the) good deeds of his race.
Let (us) deserve (the) praises of men.
Let (us) forgive (the) faults of (our) friends.
Embrace closely (thy) father, boy.
Children, do not give pain to dumb creatures.
May not Hari's mind be agitated by anger.
May we not wallow in sin.
Let (the) herdsman take (the) kine home.

* Use the imperative of the infinitive depending on "Let" and put the object of "Let" into the nominative case.

† Use the locative here.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

May (the) greed of (the) people for gold decrease.
May (the two) sons please (their) mother.
Let (the) beggars glean (the) (grains of) rice.
Let (the) fools prattle.

LESSON XXIII. 23

Imperative Mood.—(*Continued.*)

Âtmanepada Terminations.

	Singular	*Dual*	*Plural*
1st pers.	ऐ	आवहै	आमहै
2nd pers.	स्व	इथाम्	ध्वम्
3rd pers.	ताम्	इताम्	अन्ताम्
	मोदै	मोदावहै	मोदामहै
	मोदस्व	मोदेथाम्	मोदध्वम्
	मोदताम्	मोदेताम्	मोदन्ताम्

Roots.

जि *with* वि *Âtm.* to conquer
पद् *with* प्रति to step towards, to do
मन् *4th conj. Âtm.* to think, to maintain, to regard
लभ् *1st conj. Âtm. with* अव to resort to, to adopt
वृत् *with* प्र to set about

Substantives.

अभिलाष *m.* desire
आचार *m.* proper conduct, conduct
ऋजुता *f.* straight-forwardness
खल *m.* a villain
देवदत्त *m.* name of a person
पात्र *n.* a deserving person or object
पार्थिव *m.* a king
प्रश्रय *m.* courtesy, civility
विद्या *f.* learning
श्रम *m.* labour
समृद्धि *f.* plenty, abundance
सूनु *m.* a son

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

SENTENCES.

शत्रुभिः सह युध्यस्व ।
चित्तं स्वास्थ्यं लभताम् ।
शिष्या गुरून् वन्दध्वम् ।
प्रजाया हिताय पार्थिवाः प्रवर्तन्ताम् ।
कन्ये गीतं शिक्षेताम् ।
भर्तारं सेवेथाम् ।
कथं दुःखं सहे ।
कीर्तये यतामहे ।
भूपते विजयस्व ।
भ्रातुर्गुणान् मा श्लाघध्वम् ।
नरा धान्यस्य समृद्ध्या मोदन्ताम् ।
आचारं प्रतिपद्येथाम् ।
जनानां धर्मेऽभिलाषो वर्धताम् ।
शृगालौ म्रियेताम् ।
वार्ताः श्रूयन्ताम् ।
प्रश्रयमवलम्बस्व ।
प्रकाशन्तां पराक्रमेण नृपस्य सूनवः ।
रमतां चित्तं छात्राणां विद्यायाम् ।
संगीतमारभामहे ।
प्रजानां कल्याणाय क्लेशाः सह्यन्तां नृपैः ।
प्रेक्षस्व वनस्य शोभाम् ।
संकटेऽप्यनृतं मा भाषावहै ।
मानिष्टमाशङ्केथाम् ।
शोभन्तां तरवः फलानामुद्गमेन ।
दुराचारेभ्यः कल्याणं मा[शंसध्वम् ।

Tremble, (the) enemies of (the) King.
Taste (thou a) mango.
Begin (you the) study of Sanskrit.
May (we) obey (the) commands of God.
Let (the) moon shine.
Let (the two) books be brought here.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

Do not (you both) regard Devadatta (an) enemy.

Rejoice at men's prosperity.

Die, villain.

May men blush at (their) misdeeds.

Let (the) virtues of (the) medicine be examined.

Let riches be given to deserving persons.

May men always seek (the) truth.

Flatter not sinners.

Let (the) birds fly from (the) branches of (the) tree.

Let rogues smile at (the) straight-forwardness of (the) good.

Let heaps of corn be given to Brâhmaṇas.

May (a) son be born to (the) king.

Obtain (thou thy) desires.

May (I) not disregard (the) orders of my father.

Let (us two) destroy our enemies.

Let (the two) faults of (the) servant be forgiven by (the) master.

Earn wealth by labour, do not beg.

Let (the two) children taste (the) sweetmeats.

May (we two) not be killed in (the) battle.

LESSON XXIV.

SOME OF THE MORE IMPORTANT VERBAL DERIVATIVES.

The past passive participle* is formed by adding त to the root; as श्रु *to hear*, श्रुत *heard*.

The infinitive of purpose is formed by adding तुम्† to the root; as श्रु *to hear*, श्रोतुम् *for hearing*.

* The feminine of this is formed by adding आ.

† The final vowel or the penultimate short takes its *guṇa* substitute before this termination.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation Digitization: eGangotri

The indeclinable past participle or absolutive is formed by adding त्वा to the root; श्रु *to hear*, श्रुत्वा *having heard*. य takes the place of त्वा when a preposition is prefixed to the root; अनुभूय *having experienced*. तू is prefixed to this य when the root ends in a short vowel; अनुकृत्य *having imitated*.

Before all these terminations except य some roots take the augment इ. As a general rule, however, roots ending in short vowels do not take it. There are some other modifications which the roots undergo, which are too various to be noticed here.

To form the present participle, the conjugational sign* is first affixed to the root, and then the termination अन् (see note*p. 6.) is added on to it when the root takes Parasmaipada terminations, and मान when it takes Âtmanepada terminations.

List of Past Passive Participles of several roots.

अस् to throw	अस्त	क्षुभ् to be agitated	क्षुब्ध
आप् to obtain	आप्त	खन् to dig	खात
कम् to desire, to love	कान्त	गम् to go	गत
कृष् to draw lines, to plough	कृष्ट	गुह् to hide	गूढ
क्रम् to go	क्रान्त	जन् to be produced	जात
क्रुध् to be angry	क्रुद्ध	तृप् to be satisfied	तृप्त
क्लम् to be weary	क्लान्त	त्यज् to abandon	त्यक्त
क्षम् to forgive	क्षान्त	दह् to burn	दग्ध
		दिश् to show	दिष्ट

* Or, more generally, take that form which the root assumes before the 3rd pers. plural termination of the present tense, and then add on the participial suffix instead of that termination.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

दुष् to be made bad	दुष्ट	रभ् to be engaged in	रब्ध
दृश् to see	दृष्ट	रम् to sport	रत
धा to put, to bear	हित	रुह् to grow	रूढ
धृष् to be proud, to dare	धृष्ट	लभ् to obtain	लब्ध
नम् to bow	नत	लुभ् to covet	लुब्ध
नश् to perish	नष्ट	वच् to speak	उक्त
पच् to cook	पक्व	वद् to speak	उदित
पद् to go	पन्न	वप् to sow	उप्त
पुष् to nourish	पुष्ट	वह् to bear	ऊढ
प्रच्छ् to ask	पृष्ट	विश् to enter	विष्ट
बन्ध् to bind	बद्ध	वृत् to be	वृत्त
भज् to worship	भक्त	शंस् to praise	शस्त
मन् to mind, to think	मत	शम् to be quiet	शान्त
मस्ज् to plunge	मग्न	श्लिष् to embrace	श्लिष्ट
मुच् to liberate	मुक्त	सह् to endure	सोढ
मुह् to be foolish	मूढ or मुग्ध	सृज् to create, to abandon	सृष्ट
मृ to die	मृत	स्पृश् to touch	स्पृष्ट
यज् to worship	इष्ट	हन् to kill	हत
युज् to join	युक्त		

Words.

अखिल *adj.* all, whole
अभिषेक *m.* coronation
अस् (to throw) *with* निर् to scatter
उटज *m.* a hut
उद्यत *past part.* of यम् *with* उद् ready, prepared
उपाय *m.* a remedy
कारागृह *n.* a prison
कुम्भकार *m.* a potter
कूप *m.* a well
क्षेत्र *n.* a field
खन् 1*st conj.* *Parasm.* and *Âtm.* *with* उद् to dig, to excavate
घट *m.* a jar
तूष्णीम् *ind.* silent, silently
दिश् *with* निर् to indicate

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

धा (to put, to bear) *with* नि to place
धृ 1*st conj. Parasm.* and *Âtm.* to seize; *with* उद् to save, to release, to lift up
नी *with* वि to educate
पङ्क *m.* mud
पीडा *f.* pain
प्रातर् *ind.* in the morning
भज 1*st conj. Parasm.* and *Âtm.* to resort to, to have recourse to
भाष् *with* प्रति to reply
मति *f.* intellect
मद *m.* pride, arrogance
मूल *n.* root, foot
मूर्च्छ् 1*st conj. Parasm.* to faint away, to swoon
यज्ञिय *adj.* belonging to a sacrifice
राजपुरुष *m.* a king's officer
रुह् *with* आ to ascend
वृत् *with* प्रति and नि, to come back, to return
समर्थ *adj.* able, powerful
सर्प *m.* a serpent
सम्यक् *adv.* well
सारमेय *m.* dog
हृ 1*st conj. Parasm.* and *Âtm. with* परि, to dispel, to remove

SENTENCES.

जलं पातुं नदीमगच्छत् ।
कुम्भकारेण घटः कृतः* ।
हरिणा सर्पो दृष्टः ।
ग्रामं गन्तुमिच्छामि ।
जनानां पीडाः परिहर्तुमीश्वरः समर्थोऽस्ति ।
भार्यां त्यक्त्वा वनं गतः ।
रामस्य पीडा नष्टा ।
उपायश्चिन्तितः ।
गृहं प्रविष्टः किंकरः ।
शम्बूकेन कथितां वार्तां श्रुत्वा रामोऽमुह्यत् ।
नद्यास्तीरे चिरं विहृत्योटजं निवृत्ता सीता ।

* In sentences in which the past participle is thus used, the copula अस्ति 'is' may be supposed to be understood.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

गृहं प्रविश्य क्व मातेत्यपृच्छत् ।
लक्ष्म्या मदेन स्पृष्टोऽसि ।
रामेण बहवः कूपास्तडागाश्चोत्खाताः ।
एवमुक्तो हरिर्ब्राह्मणाय धनमयच्छत् ।
अश्वमारोढुं* मतिर्जाता ।
शत्रून् जित्वा नगरीं प्राविशत् । [ऽलज्जत ।
सखीभिः पृष्टा ललना-

क्लेशः सोढः सीतया ।
पृथिव्यां चरितुं यज्ञियोऽश्वो मुक्तः ।
वनात्प्रतिनिवृत्य रामो राज्यं कर्तुमारभत ।
पङ्के पतितां धेनुमुद्धरति ।
रक्षितोऽस्मि देवेन ।
बहूनि काव्यानि पठितानि हरिणा ।
आतपेन क्लान्तास्तरोर्मूलं भजामः ।

(The) clouds †have been scattered by (the) wind.
(The) fields have been ploughed by (the) husbandmen, and corn has been sown.
Having well educated (the) pupil (the) preceptor gave (him) permission to marry.
(The) sea is agitated by (the) wind.

Having followed (the) dog's steps (he) came to (the) place indicated.
S'iva became satisfied with Râvaṇa's devotion.
(The) seed of virtues is placed by God in (the) heart of men.
Be ready to conquer (your) enemy.
Many soldiers were killed in (the) battle.

* From रुह्.

† In translating these sentences use the verbal derivatives taught in this lesson wherever they can be used.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

Having remembered (her) dead husband (she) again swooned.

At (the) time of (the) coronation all men were released from prison.

(The) child wishes to seize (the) moon.

The fruit of (his) exertion has been obtained by Nârâyaṇa.

Having saluted (the) goddess (he) returned from (the) temple.

Hari's faults have been forgiven by (his) father.

Having ascended (the) mountain (he) saw (a) lake.

(The) cause of fear is gone.

(He) attempts to lead villains to (the) path of (the) good.

(The) child was abandoned on (the) shore of (the) sea.

Having experienced (the) sorrows of (the) world (he) became (an) ascetic.

Many villages were burnt by (the) soldiers on (the) way.

Having replied to (his) friend (he) stood silent.

(A) son is born to Hari's wife.

Getting up*in the morning, men wash (their) faces.

(The) thieves were bound by (the) king's officers.

EXAMINATION.

1. Give the imperative (all numbers and persons) of जीव्, ईक्ष्, जन्, स्पृश्, हृ, दृ, स्था act. and pass., पा 'to drink', स्कुद्, अद्, निन्द्, शुभ्, भू *with* अनु act. and pass., सह्, &c., &c.

2. How do you form—

a. The Past Passive Participle,

b. The Present Participle Active,

* The स् of स्था is dropped after the preposition उद्.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

c. The Present Participle Passive,

d. The Infinitive of purpose,

e. The Indeclinable Past Participle or Absolutive with and without a preposition?

3. *Give the infinitive of purpose and all participles of मन्, यज्, मुच्, खन्, दह्, मृज्, वह्, लभ्, रभ्, श्लिष्, &c., &c.

4. When is the initial स् of स्था dropped?

LESSON XXV.

NOUNS ENDING IN CONSONANTS.

The general scheme of Case-endings given in Sanskrit Grammars is as follows:—

	Singular	*Dual*	*Plural*
Nom. & Voc.	स्	औ	अस्
Acc.	अम्	औ	अस्
Instr.	आ	भ्याम्	भिस्
Dat.	ए	भ्याम्	भ्यस्
Abl.	अस्	भ्याम्	भ्यस्
Gen.	अस्	ओस्	आम्
Loc.	इ	ओस्	सु

These terminations are applied without any change to masculine and feminine nouns ending in consonants, but the crude form itself undergoes certain modifications, which we will shortly notice.

---

*The pupil will require the teacher's assistance in answering this question, which is rather too advanced for him.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation Korukonda. Digitization: eGangotri

1. There are a number of nouns which undergo no change, and are declined alike, whether masculine or feminine; as भूभृत् *m.*, मरुत् *m.*, दृशद् *f.*, &c.

मरुत् *m.*

	Singular	*Dual*	*Plural*
Nom. & Voc.	मरुत्*	मरुतौ	मरुतः
Acc.	मरुतम्	मरुतौ	मरुतः
Instr.	मरुता	मरुद्भ्याम्	मरुद्भिः
Dat.	मरुते	मरुद्भ्याम्	मरुद्भ्यः
Abl.	मरुतः	मरुद्भ्याम्	मरुद्भ्यः
Gen.	मरुतः	मरुतोः	मरुताम्
Loc.	मरुति	मरुतोः	मरुत्सु

वाच् *f.*

Nom. & Voc.	वाक्†	वाचौ	वाचः
Acc.	वाचम्	वाचौ	वाचः
Instr.	वाचा	वाग्भ्याम्	वाग्भिः
Dat.	वाचे	वाग्भ्याम्	वाग्भ्यः
Abl.	वाचः	वाग्भ्याम्	वाग्भ्यः
Gen.	वाचः	वाचोः	वाचाम्
Loc.	वाचि	वाचोः	वाक्षु‡

* When there are more consonants than one at the end of a word, the first is retained and the others dropped; as मरुत् with स् becomes मरुत्स्, but स् is dropped and the form is मरुत्.

† च् or ज् is changed to क् before hard consonants, and to ग् before any soft consonant except a nasal or a semi-vowel. This change takes place also when these consonants end a word. A consonant (except a nasal) at the end of a word is changed to the first or third of its class.

‡ स् following a vowel except अ and आ, or a letter of the guttural class, or र् generally becomes ष्.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

2. Nouns ending in वत् and मत् when masculine prefix a न् to the final त् in the first five inflections.

भगवत् *m.*

	Singular	*Dual*	*Plural*
Nom.	भगवान्	भगवन्तौ	भगवन्तः
Acc.	भगवन्तम्	भगवन्तौ	भगवतः
Instr.	भगवता	भगवद्भ्याम्	भगवद्भिः
Dat.	भगवते	भगवद्भ्याम्	भगवद्भ्यः
Abl.	भगवतः	भगवद्भ्याम्	भगवद्भ्यः
Gen.	भगवतः	भगवतोः	भगवताम्
Loc.	भगवति	भगवतोः	भगवत्सु
Voc.	भगवन्	भगवन्तौ	भगवन्तः

3. Present participles differ from this only in the nominative singular, the अ of the last syllable being short, as गच्छत् *pr. part.*, गच्छन् *nom. sing.*

4. The terminations of the nominative, vocative and accusative forms of neuter nouns ending in consonants are as follows:—

Singular	*Dual*	*Plural*
(none)	ई	इ

Before the इ of the plural न् is prefixed to the final consonant, if it be not a nasal or a semi-vowel. The other cases are, as in the case of nouns ending in अ, formed exactly like those of the corresponding masculine.

Nom., Voc., and Acc. जगत् जगती जगन्ति

Nom., Voc., and Acc. गच्छत् गच्छन्ती गच्छन्ति

5. Before the ई of the nom., voc., and acc. dual of the neuter न् is prefixed to the final त् of the present participles of roots of the 1st, 4th, and 10th conjugations, and optionally to the त् of those of roots of the 6th conjugation;

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

भवत् *pr. part.*, भवन्ती *f.*, *&. n. du.*, विशत् *pr. part.*, विशन्ती or विशती *f.*, *& n. du.*, *&c.*

WORDS.

आपद् *f.* adversity
आयुष्मत् *adj.** long-lived
गुणवत् *adj.* meritorious
जगत् *n.* the world
दृशद् *f.* stone
धीमत् *adj.* sensible, talented
परवत् *adj.* dependent
प्रतिपद् *f.* the first day of a lunar fortnight
भगवत् *adj.* divine, majestic
भवत् *pron.* your Honour
भूभृत् *m.* a king
मरुत् *m.* wind, a god
मूर्तिमत् *adj.* having form
मृद् *f.* earth
यशस्वत् *adj.* famous
वाच् *f.* speech
विद्युत् *f.* lightning
विपद् *f.* adversity
वियत् *n.* the sky
शरद् *f.* autumn
श्रीमत् *adj.* prosperous
संपद् *f.* wealth, prosperity
सुखभाज् *adj.* happy, those who enjoy happiness
सुहृद् *m.* a friend
हुतभुज् *m.* fire

अकाल *m.* (अ + काल *m.* time) not the time, improper time
अत्यय *m.* passing away, destruction
अधमर्ण *m.* a debtor
अन्तःकरण *n.* the heart
अर्थ् 10*th conj.* *Âtm.* *with* अभि to request, to beg of, to solicit
इह *ind.* here
ईक्ष् *with* उप to neglect

---

*The feminine forms of adjectives ending in मत् or वत्, are formed by adding ई, as आयुष्मती, longlived (she). Of present participles the fem. form is the same as that of the nom., voc. and acc. dual.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

उच्चैस् *ind.* aloft, nobly
उद्भव *m.* birth
उद्धत *past part. pass.* of हन् *with* उद्, proud
कार्तिक *m.* name of a month
चञ्चल *adj.* transitory
जीवित *n.* life
नल *m.* name of a king
निषण्ण *past part.* of सद् *with* नि seated, sitting
प्रवृत्ति *f.* predilection
प्राण *m. pl.* life
बहुशस् *ind.* often, in many cases
महोत्सव *m.* festival
मृदु *adj.* soft
वासुदेव *m.* name of the god Krishṇa
विकार *m.* change of form, transformation
विद् *4th conj. Âtm.* to be
विहित *past pass. part.* of धा *with* वि laid down
वृन्त *n.* a stalk
श्लथ *adj.* loosened
संदेह *m.* doubt
सर्वथा *ind.* wholly
होतृ *m.* a sacrificial priest

Present Participles.

कुर्वत् doing
गच्छत् going
चोदयत् driving
जयत् conquering
पश्यत् seeing
वसत् dwelling
शासत्* ruling
सत् (*pr. part.* of अस् to be) being, good; *m.* a good or virtuous man.

Sentences.

नृशंसेभ्यो गुणवतामपि भयं विद्यते ।

चन्द्रस्य प्रकाशः शरद्याह्लादको भवति ।

---

* न् is not prefixed to त् in the first five inflections in this case. Only before the र् of the nom., voc. and acc. plur. it is prefixed optionally.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

विद्युता सह मेघो वियति वर्तते ।

वत्स आयुष्मान् भव ।

धीमन्तो लोके यशस्वन्तो भवन्ति ।

रामो मूर्तिमान् धर्म इव ।

जयतः शत्रून् मोपेक्षस्व ।

भवद्भिरादिष्टः किंकरो नगरमगच्छत् ।

नमो भगवते वासुदेवाय ।

पश्यतो गुरोः* शिष्येणाविनयः कृतः ।

हुतभुजा दग्धमरण्यमपश्यन्नलः ।

दिनेषु गच्छत्सु† नारायणः पण्डितोऽभवत् ।

महीं शासति दशरथे भूभृतिजनाः सुखभाजोऽभवन् ।

मरुतां भर्तार्जुनं द्रष्टुमिच्छति ।

कवीनां वाक्षु माधुर्यमस्ति ।

सुहृदोर्वचनमलङ्घनीयम् ।

भवन्तः पुत्रैः सहागच्छन्त्विति श्रीमतो देवस्याज्ञा ।

घटा मृदो विकारा अलंकाराश्च सुवर्णस्य ।

प्राणानामत्ययेऽप्यसन्तः सद्भिर्नाभ्यर्थ्यन्ते ।

इह जगति पुत्रस्योद्भव उत्सवस्य हेतुः ।

संदेहे सतामन्तःकरणस्य प्रवृत्तयः प्रमाणम् ।

विपद्युच्चैः स्थीयते सद्भिः ।

दृशदि निषण्णो गुरुः शिष्यान्धर्ममुपादिशत् ।

---

* This is an instance of the genitive absolute; it has the sense of 'notwithstanding.'

† This is an instance of the locative absolute; the meaning is like that of the English nominative absolute—*days having elapsed.*

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

अधमर्णाः सर्वथा परवन्तो भवन्ति ।

Nârâyaṇa is not dependent.

Deer sit on stones in (a) [forest.

Indra is (the) lord of (the) gods.

On (the) first of *Kârtika* there is (a) festival.

(I) saw (a) boy going to school.

In prosperity many persons follow (a) man.

(A) man is abandoned by (his) friends in adversity

Kṛishṇa saw men driving horses.

(The) ascetics regard (the) world as (a) wilderness.

(A) work is written by (the) talented Nârâyaṇa.

Even (the) meritorious are censured by (the) wicked.

Men always desire to be long-lived.

(It) has been so laid down by (the) divine Manu.

अकालो नास्ति धर्मस्य जीविते चञ्चले सति ।

Anger cools down by soft speech.

Nârada descended from (the) sky.

(The) good do not become proud on account of (by) wealth.

(It) was so advised by (our) preceptor (when he was) going to heaven.

(While) living in (a) forest Râma and Lakshmaṇa destroyed many demons.

(I) am very pleased by seeing (a sight of) your Honour.

(The) talented are honoured at (the) courts of kings.

(The) wind takes away (the) loosened flower from (the) stalk.

Lightning is considered by poets (as the) wife of (the) cloud.

Fire, (if) touched, burns even (the) Hotṛi.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

(The) desire for happiness of those who enjoy happiness often increases by	(their) enjoyment of happiness.

Râma lived in (the) prosperous city of Ayodhyâ.

EXAMINATION.

1. Repeat the case-terminations occurring in Sanskrit Grammars.

2. Compare the declension of nouns in वत् or मत् with that of present participles, and of these with that of any ordinary noun ending in a consonant, such as भूभृत्.

3. How do you form the neuter dual (nom., voc., acc.) or feminine of present participles, and of adjectives in वत् or मत्?

4. How is च् or ज् treated when followed by hard or soft consonants, or when it is at the end of a word?

5. In what circumstances is स् generally changed to ष्?

6. Decline प्रतिपद्, हुतभुज्, यशस्वत् *m.*, *f.* & *n.*, कुर्वत् *m.*, *f.* & *n.*, सुखभाज् *m.* & *n.*, आयुष्मत् *m.* & *n.*, दिशत् *m.*, *f.* & *n.*, परवत् *m.*, आपद्, चोदयत् *m.*, *f.* & *n.*, *&c.*, *&c.*

7. Explain, with instances, the use of the Loc. and Gen. absolute.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

LESSON XXVI.

Nouns ending in अन् and इन्.

1. स्, the nominative and vocative singular termination, is dropped (*see* note*, page 97).

2. न् is dropped in the nominative singular, and before all terminations beginning with consonants.

3. The अ is lengthened in the first five inflections, and इ in the nominative singular only. This rule does not hold good in the case of neuter nouns. But in the plural of the nom., voc. and acc. of these, the अ and इ are lengthened.

4. अ is dropped before the vowel terminations, beginning with the अस् of the accusative plural, but not in cases when the अ is preceded by a conjunct consonant of which म् or व् is the final member. This rule is applied optionally in the locative singular of masculine and neuter nouns, and in the nom., voc., and acc. dual of the latter.

5. The vocative singular does not differ from the crude. In the neuter न् is optionally dropped.

राजन् *m.*

	Sing.	*Du.*	*Pl.*
Nom.	राजा	राजानौ	राजानः
Acc.	राजानम्	राजानौ	राज्ञः*
Instr.	राज्ञा	राजभ्याम्	राजभिः

* The अ of the final syllable अन् being dropped, we have राज्न्. By a rule of *sandhi* (*see* page 21, note*), न् becomes ञ्, which, with the preceding ज, becomes ज्ञ्.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Digitization: eGangotri

	Singular	Dual	Plural
Dat.	राज्ञे	राजभ्याम्	राजभ्यः
Abl.	राज्ञः	राजभ्याम्	राजभ्यः
Gen.	राज्ञः	राज्ञोः	राज्ञाम्
Loc.	राज्ञि-राजनि	राज्ञोः	राजसु
Voc.	राजन्	राजानौ	राजानः

आत्मन् *m.*

Nom.	आत्मा	आत्मानौ	आत्मानः
Acc.	आत्मानम्	आत्मानौ	आत्मनः
Instr.	आत्मना	आत्मभ्याम्	आत्मभिः
Dat.	आत्मने	आत्मभ्याम्	आत्मभ्यः
Abl.	आत्मनः	आत्मभ्याम्	आत्मभ्यः
Gen.	आत्मनः	आत्मनोः	आत्मनाम्
Loc.	आत्मनि	आत्मनोः	आत्मसु
Voc.	आत्मन्	आत्मानौ	आत्मानः

नामन् *n.*

Nom. and Acc.	नाम	नामनी or नाम्नी	नामानि
Instr.	नाम्ना	नामभ्याम्	नामभिः
Dat.	नाम्ने	नामभ्याम्	नामभ्यः
Abl.	नाम्नः	नामभ्याम्	नामभ्यः
Gen.	नाम्नः	नाम्नोः	नाम्नाम्
Loc.	नामनि-नाम्नि	नाम्नोः	नामसु
Voc.	नामन् or नाम	नामनी or नाम्नी	नामानि

शशिन् *m.*

Nom.	शशी	शशिनौ	शशिनः
Acc.	शशिनम्	शशिनौ	शशिनः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

	Singular	*Dual*	*Plural*
Instr.	शशिना	शशिभ्याम्	शशिभिः
Dat.	शशिने	शशिभ्याम्	शशिभ्यः
Abl.	शशिनः	शशिभ्याम्	शशिभ्यः
Gen.	शशिनः	शशिनोः	शशिनाम्
Loc.	शशिनि	शशिनोः	शशिषु
Voc.	शशिन्	शशिनौ	शशिनः

भाविन् *n.*

Nom. and Acc.	भावि	भाविनी	भावीनि
Voc.	भाविन् or भावि	भाविनी	भावीनि

The rest like शशिन्.

WORDS.

अनुजीविन् *m.* a servant

अन्तरात्मन् *m.* the internal soul, the heart

अपराधिन् *adj.* guilty, offending

अश्मन् *m.* a stone

आत्मन् *m.* the soul, self

उत्सङ्गवर्तिन् *adj.* (उत्सङ्ग *m.* lap) resting on the lap

कञ्चुकिन् *m.* an attendant on the women's apartments, chamberlain

कर्मन् *n.* action

कुशलिन् *adj.* happy, well

क्षयिन् *adj.* lessening, decreasing

क्षेत्रगामिन् *adj.* going to a holy place

चर्मन् *n.* leather

नामन् *n.* name

पक्षिन् *m.* a bird

प्राणिन् *m.* an animal

प्रियवादिन् *adj.* speaking sweetly

प्रेमन् *m. n.* affection

फलाशिन् *adj.* a fruit-eater

ब्रह्मन् *m.* the Creator

भाविन् *adj.* what is to be, future.

महिमन् *m.* greatness

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

मूर्धन् *m.* the head
मेधाविन्* *adj.* talented, intelligent
योगिन् *m.* an ascetic
राजन् *m.* a king
लघिमन् *m.* littleness
वर्त्मन् *n.* a way, a path
विश्वकर्मन् *m.* the architect of the gods
शिखरिन् *m.* a mountain
शूलिन् *m.* name of the god S'iva
सद्मन् *n.* a house
सीमन् *f.* boundary, bounds
स्वामिन् *m.* lord
हेमन् *n.* gold

अनर्थ *m.* disadvantage, evil
अन्तःपुर *n.* the apartment occupied by women in a house
अमात्य *m.* counsellor
अम्बर *n.* the sky
अर्थ *m.* a thing, occurrence, event
अवतरत् *pr. part.* of तृ *with* अव descending [ter
आत्मजा *f.* daugh-
आरम्भ *m.* beginning, performance
उपकार *m.* doing good to another, obligation, benefiting another
उपानह्† *f.* a shoe
कुण्ठित *past part. pass.* of कुण्ठ्, hampered, impeded
कृ *with* आविस् [आविष्कृ‡] to manifest, to show, to expose
केवलम् *adv.* solely
कैकेयी *f.* name of a wife of Daśaratha
कौशल्य *n.* skill, proficiency
क्रमेण *instr. sing.* of क्रम, gradually
गण् 10*th conj.* to count, to reckon, to consider
गुरु *adj.* long
जगत्कर्तृ *m.* creator of the world
जीविका *f.* liveli-
जीवित *n.* life [hood
दिन *n.* a day
दुष्ट *past part.* of दुष्, wicked
दूर *adj.* distant
दैन्य *n.* meanness

---

* The feminine form of an adjective ending in इन् is made up by adding ई; as मेधाविनी 'talented' (woman).

† The ह् of this word becomes त् and द् in the circumstances mentioned in note † page 97.

‡ See note ‡, p. 97.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

द्रु 1st *conj. Parasm.* to melt with pity

न कदापि never

निर्मित *past pass. part.* of मा *with* निर् created, constructed, formed, made

निर्वृतिमत् *adj.* happy

निवेशित *past part. pass.* of the *causal* of विश् *with* नि, placed

परार्ध *m.* the second or latter part

पश्चात् *ind.* afterwards

पुण्यवत् *adj.* virtuous

पूर्वार्ध *m.* the first part

प्रसन्न *past part.* of सद् *with* प्र, pleased

प्रियवादित्व *n.* kindliness of speech

बुद्धि *f.* intellect

मधुरम् *adv.* sweetly

यात्रिक *m.* a pilgrim

लक्ष् 10th *conj. with* सम् to observe, to test, to prove

लघु *adj.* short

वासुदेव *m.* name of Krishṇa's father

विनाश *m.* destruction

विशुद्धि *f.* purity

विश्वास *m.* confidence.

वृद्धिमत् *adj.* lengthening

व्याली *f.* a tigress

शुभ *adj.* good, virtuous

श्यामिका *f.* impurity

श्रवण *n.* hearing

श्रीपेण *m.* name of a person

साशङ्क *adj.* suspicious

सुख *n.* ease

सोत्कण्ठ *adj.* anxious

स्वप्न *m.* a dream

SENTENCES.

योगिनः फलाशिनो भवन्ति।

अपराधिनं मा क्षमस्व।

अनुजीविने कुप्यति भर्ता।

दशरथस्य पुत्रो नाम्ना रामः।

ब्राह्मणः प्रजाः प्रजायन्ते।

राजन् कुशली भव।

कञ्चुकी राज्ञामन्तःपुरेऽधिकृतः पुरुषः।

भाविनोऽनर्थान् ज्ञातुं न समर्थोऽस्ति जनः।

अश्मभिरश्वस्य गतिः कुण्ठिता।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

जगत्कर्तुर्महिम्नां फलं सर्वत्र दृश्यते ।

क्षेत्रगामिना वर्त्मना गच्छन्तं यात्रिकमपश्यम् ।

जनस्य कल्याणाय यतमानेन रामेणात्मा क्लेशमुपानीयत ।

आत्मनः पुत्राणां कर्मसु कौशलं प्रशंसति ।

कृष्णो वासुदेवस्य सद्मनि वसन्न*म्वरादवतरन्तं नारदमपश्यत् ।

श्रीषेणस्य राज्ञो महिषी सूर्यं चन्द्रं चात्मन उत्सङ्गवर्तिनौ स्वप्नेऽपश्यत् ।

अपराधिनः पुरुषान्दण्डयन्तु राजानः ।

अश्मनेव निर्मितं दुष्टानां हृदयं परकीयस्य दुःखस्य श्रवणेन न कदापि द्रवति ।

शुभानां कर्मणामारम्भः कल्याणाय ।

जगता कुटुम्बिनं मन्यत† आत्मानं साधुः ।

प्राणिनामुपकारायैव साधूनां जगति जीवितम् ।

प्रियवादिनां प्रियवादित्वं दैन्यं गण्यते शठैः ।

